শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

সরলকৱি শ্রীরাঘৱাচার্য কৃতং

# ॥শ্রী মহালক্ষ্মী মঙ্গলম্॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते रामानुजाय नमः

# ॥श्री महालक्ष्मी मङ्गलम्॥

ৱেদান্তৱেদ্যৱিভৱে ৱিষ্ণুৱক্ষোৱিহারিণি।
অরৱিন্দাক্ষদযিতে লক্ষ্ম্যস্তু তৱ মঙ্গলম্॥ ১॥

সর্ৱমঙ্গলমাঙ্গল্যে সর্ৱমঙ্গলদেৱতে।
সর্ৱমঙ্গলযা স্তুত্যে লক্ষ্ম্যস্তু তৱ মঙ্গলম্॥ ২॥

পদ্মসদ্মে পদ্মহস্তে পদ্মলোচনভামিনি।
পদ্মভূপূজিতে নিত্যং লক্ষ্ম্যস্তু তৱ মঙ্গলম্॥ ৩॥

ইন্দ্রাণী মুখ গীর্ৱাণী গণসেৱা প্রহর্ষিণি।
সর্ৱেষাং জগতামম্ব লক্ষ্ম্যস্তু তৱ মঙ্গলম্॥ ৪॥

ত্বদিঙ্গিতপরাধীনো হরিসসর্ৱেশ্বরোপি সন্।
কুরুতে নিখিলং কর্ম লক্ষ্ম্যস্তু তৱ মঙ্গলম্॥ ৫॥

ইন্দ্রায ত্যক্তশাপায ত্রৈলোক্যৈশ্বর্যদাযিনি।
অষ্টভির্মূর্তিভির্জুষ্টে লক্ষ্ম্যস্তু তৱ মঙ্গলম্॥ ৬॥

সুপর্ৱভিসসদারাধ্যে শোভাৱতি শুচিস্মিতে।
সর্ৱকামপ্রদে দেৱি লক্ষ্ম্যস্তু তৱ মঙ্গলম্॥ ৭॥

শুভানি নিজনামানি সদাৱর্তযতাং সতাম্।
মুদা শ্রেযোৱিধাযিন্যা লক্ষ্ম্যস্তু তৱ মঙ্গলম্॥ ৮॥

সতামাত্মহৱিস্ত্যাগক্রিযোদ্দেশ্যতযা স্থিতে।
কান্তেন হরিণা সাকং লক্ষ্ম্যস্তু তৱ মঙ্গলম্॥ ৯॥

স্বদৃষ্টিগোচরস্থানসিধ্যতসংপতসমৃদ্ধিকে।
ৱিলসতসর্ৱকল্যাণে লক্ষ্ম্যস্তু তৱ মঙ্গলম্॥ ১০॥

দিৱ্যং স্থানং পরিত্যজ্য পত্যা সহ নমস্কৃতে।
ওংকারনগরীং প্রাপ্তে লক্ষ্ম্যস্তু তৱ মঙ্গলম্॥ ১১॥

www.prapatti.com

যঃ পঠেতসন্ততং লক্ষ্মীমঙ্গলম্ ভক্তিমান্ নরঃ।
স স্যাত্তস্যাঃ প্রসাদেন সর্ৱমঙ্গলভাজনম্॥ ১২ ॥

॥ ইতি শ্রী মহালক্ষ্মী মঙ্গলং সংপূর্ণম্॥

www.prapatti.com